त्रिसुगन्धि, क्ली, (त्रयाणां सुगन्धिद्रव्याणां समाहारः।) त्रिजातकम्। इति राजनिर्घण्टः॥ (यथा, अश्ववैद्यके। १२। ७३।
"त्वगेलापत्रसंयोगे त्रिसुगन्धि त्रिजातकम्।
नागकेसरसंयुक्तं चतुर्जातकमुच्यते॥")

त्रिसुपर्णः, पुं, ऋक्चयानां वेदभागः। तद्व्रतञ्च। तद्योगात् पुरुषोऽपि त्रिसुपर्णः। इति मनुटीकायां कुल्लूकभट्टः॥ (यथा, मनुः।३।१८५।
"त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षड़ङ्गवित्॥")

त्रिस्रोताः, [स्] स्त्री, (त्रीणि स्रोतांसि यस्याः। यद्वा, त्रिषु लोकेषु स्वर्गमर्त्त्यपातालेषु स्रोतांसि यस्याः।) गङ्गा। (यथा, माघे।३।१०।
"अङ्कुरनिहूतमिवोद्यश्रवे-
स्त्रिस्रोतसः सन्ततधारमम्भः॥")
नदीभेदः। इति मेदिनी। से, ५४॥

त्रिहल्यं, त्रि, (त्रिवारं हलेन कृष्टम्। हल+"मतजनहलात् करणजल्पकर्षेषु।" ४।४।९७। इति यत्।) वारत्रयकृष्टक्षेत्रम्। तत्पर्य्यायः। त्रिगुणाकृतम् २ तृतीयाकृतम् ३ त्रिसीत्यम् ४। इत्यमरः।२।९।९॥

त्रिहायणी, स्त्री, (त्रयो हायना यस्याः। "दामहायनान्ताच्च।" ४।१।२७। इति ङीप्। "त्रिचतुर्भ्यां हायनस्य।" इति णत्वम्।) त्रिवर्षा गौः। इत्यमरटीकायां रमानाथः॥ (यथा, कात्यायनश्रौतसूत्रे। २२।९।१३।
"वत्सतर्य्यश्च त्रिहायण्योऽशीताः पञ्चवर्णा राजीव एण्यौ नवनीतप्रयोऽरुणाः पिशङ्गाः सारङ्गाः॥") द्रौपदी। यथा,—
"कृते युगे वेदवती त्रेतायां जनकात्मजा।
द्वापरे द्रौपदीच्छाया तेन कृष्णा त्रिहायणी॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डम्॥
(त्रिवत्सरे, त्रि। यथा, महाभारते। ३। २३६।६।
"अथ संस्कारकं कृत्वा लक्षयित्वा त्रिहायणान्।
वृतो गोपालकैः प्रीतो व्यहरत् कुरुनन्दनः॥")

त्रुट, क ङ } छिदि। इति कविकल्पद्रुमः॥
त्रुट, य शि } (चुरां-आत्मं-दिवां तुदां-परं-अवयवद्विधाभावमात्रे अकं-छेदनमात्रे सकं-सेट्।) द्वौ दन्त्यवर्गप्रथमादी। क ङ, त्रोटयते। य, त्रुट्यति त्रोटिष्यति। तुदादान्तर्गणस्यैव कुटादित्वमिति। दिवादिपक्षे न कुटादित्वम्। शि, त्रुटति अत्रुटीत्। शेषस्तु विदीर्णभावेऽपि। यथा, त्रुट्यद्भीमधनुःकठोरनिनद इति महानाटकम्। मयूखनखरत्रुटत्तिमिरकुम्भिकुम्भस्थले। क्वचित्कर्मभावेऽपि यथा। व्याहन्यते यदि त्रुटिष्यति वासस्तदा जघने रघुद्रुटः। इति दुर्गादासः॥

त्रुटिः, स्त्री, (त्रुट्यते इति। त्रुट+"इगुपधात् कित्।" उणां।४।१२०। इति इन् स च कित्।) सूक्ष्मैला। (यथा, सुश्रुते। उत्तरतन्त्रे। ५२।
"उत्कारिकां सर्पिषि नागराढ्यां
पक्त्वा समूलैस्त्रुटिकोलपत्रैः॥"
अस्याः पर्य्यायो यथा,—
"वयस्था तीक्ष्णगन्धा च सूक्ष्मैला त्रिपुटा त्रुटिः॥"
इति वैद्यकरत्नमालायाम्॥)
अल्पम्। संशयः। कालभेदः। स च क्षणाचरचतुर्भागयक्षणात्मकः। इत्यमरः।३।३।३७॥ क्षणद्वयात्मकः। इति तट्टीकायां स्वामी॥ यथा, भागवते।३।११।५।
"अणुर्द्वौ परमाणू स्यात् त्रसरेणुस्त्रयः स्मृतः।
जालार्करश्म्यवगतः खमेवानुपतन्नगात्।
त्रसरेणुत्रिकं भुङ्क्ते यः कालः सा त्रुटिः स्मृता॥")

त्रुटिबीजः, पुं, (त्रुटिरल्पं बीजमस्य।) कचुः। इति शब्दमाला॥

त्रुटी, स्त्री, (त्रुटि+"कृदिकारादक्तिनः।" इति वा ङीष्।) त्रुटिः। इत्यमरटीकायां भरतः॥

त्रुप, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) त्रुम्पति। इति दुर्गादासः॥

त्रुफ, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) त्रुम्फति। इति दुर्गादासः॥

त्रुप, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) त्रोपति। इति दुर्गादासः॥

त्रुफ, वधे। इति कविकल्पद्रुमः॥ (भ्वां-परं-सकं-सेट्।) त्रोफति। इति दुर्गादासः॥

त्रेता, स्त्री, (त्रीन् भेदान् एति प्राप्नोतीति। यद्वा, त्रित्वमिता। पृषोदरादित्वात् साधुः। एतन्निरुक्तिर्यथा, हरिवंशे।२०५।५।
"त्रिधा प्रणीतो ज्वलनो मुनिभिर्वेदपारगैः।
अतस्तु तात्वमापन्नो यदेकस्त्रिविधः कृतः॥")
दक्षिणाग्निः गार्हपत्यः आहवनीयः एकोक्त्या इदमग्नित्रयम्। इत्यमरः।२।७।२०॥ (यथा, हरिवंशे।२९।४५-४६।
"मथित्वाग्निं त्रिधा कृत्वा अयजत् स नराधिपः।
इष्ट्वा यज्ञैर्बहुविधैर्गतस्तेषां सलोकताम्॥
गन्धर्वेभ्यो वरं लब्ध्वा त्रेताग्निं समकारयत्।
एकोऽग्निः पूर्व्वमेवासीदैलस्त्रेतामकारयत्॥")
द्वितीययुगम्। तस्य परिमाणं यथा,—
"त्रिचत्वारिंशल्लक्षेण विंशत्सहस्राधिकेन च।
चतुर्युगं परिमितं नरमानक्रमेण च॥
द्विषट्लक्षपरिमितं षण्णवतिसहस्रकम्।
त्रेतायुगं परिमितं कालविद्भिः प्रकीर्त्तितम्॥"
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डम्॥ *॥
तस्य धर्म्मो यथा,—
"त्रेतायुगे समायाते धर्म्मः पादोनतां गतः।
अल्पक्लेशान्विता लोकाः केचित् केचित् दयाश्रयाः॥
विष्णुध्यानरता लोका यज्ञदानपरायणाः।
वर्णाश्रमाचाररताः सुखिनः सुस्थचेतसः॥
क्षत्रा भूमिस्पृशः शूद्राः सर्व्वे ब्राह्मणसेविनः।
ब्राह्मणाश्च महात्मानो वेदवेदाङ्गपारगाः॥
प्रतिग्रहनिवृत्ताश्च सत्यसन्धा जितेन्द्रियाः।
तपोव्रतरता नित्यं दातारो विष्णुसेविनः॥
कालवर्षी तडित्वांश्च स्त्रियः सर्व्वाः पतिव्रताः।
वसुन्धरा च प्रस्याढ्या पुत्त्राश्च पितृसेविनः॥"
इति पाद्मे क्रियायोगसारः॥

त्रेतायुगं, क्ली, (त्रेतैव युगम्।) द्वितीययुगम्। तस्योत्पत्त्यादि यथा,—
"कार्त्तिकशुक्लनवम्यां सोमवारे त्रेतायुगोत्पत्तिः। तत्र अवतारत्रयम्। वामनपरशुरामश्रीरामचन्द्राः। पुण्यं त्रिपादम्। पापमेकपादम्। पुष्करनामकं तीर्थम्। मानसिको ब्राह्मणः। अस्थिगताः प्राणाः। चतुर्द्दशहस्तपरिमितो मानवदेहः। दशसहस्रवर्षं परमायुः। व्यवहार्य्यं रौप्यपात्रम्। तद्युगाब्दाः १२९६०००। तत्र राजानः सूर्य्यवंशीयबाहुकसगरांशुमदसमञ्जसदिलीपभगीरथाजदशरथश्रीरामचन्द्रकुशीलवा एते चक्रवर्त्तिनः। तल्लक्षणम्।
दानधर्म्मरता नित्यं तपस्या तीर्थदर्शनम्।
अग्निहोत्रपरा लोका राजानो यज्ञकारिणः॥
तत्र तारकब्रह्मनाम।
रामनारायणानन्त मुकुन्द मधुसूदन।
कृष्ण केशव कंसारे हरे वैकुण्ठ वामन!॥"
इति सुदाङ्कितपञ्जिकातः संगृहीतम्॥

त्रेतायुगाद्या, स्त्री, (त्रेतायुगस्य आद्या प्रथमा तिथिः।) त्रेतायुगारम्भतिथिः। सा च कार्त्तिकशुक्लनवमी। तत्प्रमाणं युगाद्याशब्दे द्रष्टव्यम्॥

त्रेधा, व्य, (त्रिप्रकारम्। "संख्याया विधार्थे धा।" ५।३।४२। इति धा। "एधाच्च।" ५।३।४६। इति धा इत्यस्य एधाच्।) त्रिधा॥ इति मुग्धबोधम्॥ (यथा, ऋग्वेदे।१।२२।१७।
"इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्।
समूढ़मस्य पांसुरे॥")

त्रै, ङ पालने। इति कविकल्पद्रुमः॥ (भ्वां-आत्मं-सकं-अनिट्।) दन्त्यवर्गाद्यादिः। ङ, त्रायते। चक्रिंस्त्राहीत्यादौ त्राहीति त्रायते त्रा विच् पश्चात् त्रा इवाचरतीति क्वौ साध्यम्। केचिद् दादौ त्रा पठन्ति। इति क्रमदीश्वरः। इति दुर्गादासः॥

त्रैगुण्यं, क्ली, (त्रिगुणानां भावः कर्म्म वा। त्रिगुण+ष्यञ्।) त्रिगुणधर्म्मः। सत्त्वरजस्तमस्त्वम्। यथा,—
"त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्ज्जुन!।"
इति श्रीभगवद्गीता॥
शैत्यसौगन्ध्यमान्द्यम्। यथा,—
"त्रैगुण्यललितैर्मारुतैरङ्गिरुपवीजिते॥"
इति शिवरात्रिव्रतकथा॥
त्रिभिः पूरणञ्च॥

त्रैधं, व्य, (त्रिप्रकारमिति विधा। ततः "द्वित्र्योश्च धमुञ्।" ५।३।४५। इति धा इत्यस्य धमुञ्।) त्रिधा। इति मुग्धबोधम्॥ (यथा, महाभारते।३।३२।३२।
"सर्व्वमेव हठेनैके दैवेनैके वदन्त्युत।
पुंसः प्रयत्नजं किञ्चित् त्रैधमेतन्निरुच्यते॥")